१. लिङ्गतोभद्रदेवानां स्थापन-
पूजनविधिः - पत्र-3. सं०

1390

11"X5"

= अथ लिङ्गतोभद्र देवानां स्थापन पूजन विधिः =

१ अथ लिंगतोभद्रदेवानां स्थापनपूजनविधिः कलशे संपूज्य अद्येहेत्यादि मंडलस्थापितदेवानां पूजनं
महं करिष्ये मध्येऽष्टदले ब्रह्मा ब्रह्म यज्ञानमिति मंत्रेण ब्रह्माणं संपूज्य ततः उदीचीमारभ्य वायवीप
र्यंतं सोमादयो वाच्यंतः अष्टौ लोकपालाः स्थापनीयाः वायुसोममध्येऽष्टौ वसवः वसुभ्यस्त्वेति
सोमेशानमध्ये एकादशरुद्राः नमस्तेति ईशानेंद्रमध्ये द्वादशादित्याः आदित्यं गर्भमिति इंद्रा
ग्नेयमध्येऽश्विनौ अश्विनातेजसा चक्षुरिति आग्नेययमयोर्मध्ये सपैतृक विश्वेदेवाः विश्वेदेवाः
विश्वेदेवा अथ सुखम्सु व इति यमनिर्ऋतिमध्ये पन्नगाः हंसः शुचिषदिति निर्ऋतिवरुणमध्ये भू
तनागाः भूतानपत्येति मंत्रेण वरुणवायुमध्ये गंधर्वाऽप्सरसः गंधर्वस्त्वेति ब्रह्मसोममध्ये स्कंद
नंदीश्वरशूलमहाकालाः यदक्रंद इति ब्रह्मेशानमध्ये दक्षादिसप्तप्रजापतेनत्वदेवतेति ब्रह्मेंद्रम
ध्ये दुर्गाविष्णुश्च अंबे अंबिके इदं विष्णुरिति ब्रह्माग्निमध्ये स्वधापितृभ्य इति मंत्रेण ब्रह्मयममध्ये

मृत्युरोगाः त्र्यंबकमिति मंत्रेण ब्रह्मनिऋतिमध्ये गणपतिं गणानां त्वेति ब्रह्मवरुणमध्ये अधो
धारत्री महीद्यौरिति मंत्रेण ब्रह्मवायुमध्ये नक्षत्रयोगाः नक्षत्रेभ्यः स्वाहा योगे योगेति मंत्रेण
ब्रह्मणः पादमूले पश्चिमकर्णिकायां अधः पृथ्वी महीद्यौरिति ब्रह्म उत्तरकर्णिकायां गंगादिनद्यः
पंचनद्यइति ब्रह्मपूर्वकर्णिकायां सप्तसागराः समुद्रायत्वेति ब्रह्मदक्षिणकर्णिकायां हेमाद्रादिमग
वः पारन्वेति मंडलाद्बहिः सोमादिसमीपे तत्क्रमेण गदादित्रिशूलवज्रशक्तिदंड२ खड्गपाशांकुशाः
विष्णोः कर्माणीति तद्बाह्ये पुनरपि तेनैव क्रमेण गौतमात्रिभरद्वाजाविश्वामित्रकश्यपयमद
ग्निवशिष्ठअरुंधतयः सप्तर्षयइति तद्बाह्ये पूर्वादिक्रमेण ऐंद्रीकौमारीब्राह्मीवाराहीचां
मुंडाः वैष्णवीमाहेश्वरीविनायकाः इत्यष्टौ शक्तयः आपोस्मान्निति पूजयेत धूपादीपानिनिदध्या
र अनेनार्चनेन मंडलस्य देवाः प्रीयंतां भो मंडलस्य देवाः एवं दध्यक्षतमाषपायसान्वसदीपवं
सप्तन्नप्रय प्रतितिलाश

त्तिः बलिं मुंस्च दिशं रक्षयजमानस्याभ्युदयंकुरु पूजांसांगतां दक्षिणां दद्यात् इत्यत्तिं गतोभ

द्रकजनानि समस्तानि लिखितंमया पुराणाधेनानमार्थं।।